॥ श्रीः ॥

विद्याभवन प्राच्यविद्या ग्रन्थमाला

१३३

श्रीमदन्नम्भट्टविरचितः

# तर्कसंग्रहः

न्यायबोधनी-पदकृत्य-दीपिका-किरणावलीव्याख्योपेतः

सम्पादकः

श्रीकृष्णवल्लभाचार्य

चौखम्बा विद्याभवन

वाराणसी

# निवेदनम्

परमेश्वरस्येव निखिलाऽऽगमसञ्चरणशीलत्वात्सर्वशास्त्रोपकारकस्याऽस्य न्यायशास्त्रस्य प्राधान्यं परिवर्तीह जगत्यामिति सर्वेषां विदितमस्त्येव, एवञ्चेहाऽमुत्र श्वःश्रेयसमधिजिगमिषूणाम्प्रत्येकमेतदधीनतत्त्वज्ञानस्य परमाऽऽवश्यकतामेकतोऽपरतश्चाऽतिदुर्गमाऽन्तन्यायशास्त्राऽम्बुधेरनुल्लङ्घनीयतां विचिन्तयन्तो विश्वकर्मकल्पाः श्रीमन्तोऽन्नम्भट्टमहोदयाः सतीष्वप्यमितप्रमाणनिबन्धबृहत्तरणिषु छात्रसांयात्रिकान् विनाऽऽयासं शीघ्रम्पारं प्रापिपयिषवः सन्तः सुगममिमं तर्कसंग्रहविमानराजं निर्ममिरे, सत्यप्येवं तदुपकरणकल्पदीपिकाप्रभृतिटीकादुरधिगमयन्त्राणां सरलव्याख्याकुञ्चिकामन्तरेण सञ्चालनादिविज्ञानसम्पन्नानामपि पारं दिदृक्षूणां स्वाऽभिलषिताऽवगमो न स्यादित्यवगम्य समूलदीपिकायाश्चमत्कृतिकरां सुविस्तराञ्च किरणावलीनामधेयव्याख्या-न्यायबोधिनी पदकृत्यविषमस्थलीयटिप्पणीकुञ्चिकां निर्माय—करुणाशेवधिविश्वविख्यात-सर्वतन्त्रस्वतन्त्र-नैयायिकधुरन्धर-तर्कतीर्थन्यायाऽऽचार्य-मदीयगुरुवर्य-श्रीमद्-"वामाचरणभट्टाचार्या"ऽङ्घ्रिसरोजेषु समार्पयम्, ते च परमदयालवः कृत्स्नामिमां सुचिन्त्याधिजिगांसमानानामन्तेवासिनामुपकृतये साऽनुग्रहं पर्यैक्षिषत, तदस्य सर्वजनीनस्यैकं संस्करणं वर्षद्वयाऽभ्यन्तरे एव निःशेषतां गतम्, अतोऽस्य द्वितीयमिदं संस्करणं सहर्षं प्रकाश्यते ।

साम्प्रतयँ यद्यपि तर्कसंग्रहो विद्वद्वरेण्यविरचिताभिर्नूतनाऽनेकटीकाभिः समलङ्कृतः समुपलभ्यते नाम, तथापि तदपेक्षयाऽत्र पदकृत्यसंयोजनं टिप्पणीनिवेशष्टीकासारल्यञ्चेत्यधिकं विराजते। किञ्च-सन्ति नाम विभिन्नयन्त्राऽऽलयमुद्रितासु न्यायबोधिनी पदकृत्यदीपिकासु टीकासु न्यूनाऽधिकपाठान्तराणि, तानि च समवाप्य तत्र प्रामाणिकाऽनुभवविषयताङ्गता>< पाठास्तावदत्र सुरक्षिताः पाठान्तराणि च संयोजितानि, एवं सत्यपि गुणैकपक्षपातिभिर्भवद्भिरक्षरयोजकाऽनवधानादिना समुत्पन्नत्रुटयस्तावत् कृपया स्वयं समाधेलिमा इति ॥

अपि च "श्रीस्वामिनारायणवेदान्तसारः, सांख्यकारिकाग्रन्थस्य 'श्रीकृष्णवल्लभाचार्यस्वामिनारायणभाष्यं, सांख्यतत्त्वकौमुद्याः किरणावली टीका चेति ग्रन्था अपि विरचय्य प्रकाशिताः । योगसूत्राणां भाष्यं, न्यायसिद्धान्तमुक्तावल्याः किरणावली टीका, तदन्ये च निबन्धाः, यथासमयं लब्धे साहाय्ये प्रकाशमेष्यन्तीति-प्रकृतमुपसंहरति–

"श्रीकृष्णवल्लभाऽऽचार्य"स्वामिनारायणः ॥

❀ श्रीः ❀

# तर्कसंग्रहः

* न्यायबोधिनी-पदकृत्य-दीपिका-किरणावली-व्याख्योपेतः *

निधाय हृदि विश्वेशं विधाय गुरुवन्दनम् ।
बालानां सुखबोधाय क्रियते तर्कसंग्रहः ॥ १ ॥

## ❀ न्यायबोधिनी ❀

अखिलागमसंचारि श्रीकृष्णाख्यं परं महः ।
ध्यात्वा गोवर्धनसुधीस्तनुते न्यायबोधिनीम् ॥ १ ॥

## ❀ पदकृत्यम् *

श्रीगणेशं नमस्कृत्य पार्वतीशंकरं परम् ।
मया चन्द्रजसिंहेन क्रियते पदकृत्यकम् ॥ १ ॥
यस्मादिदमहं मन्ये बालानामुपकारकम् ।
तस्माद्धितकरं वाक्यं वक्तव्यं विदुषा सदा ॥ २ ॥

## * दीपिका *

विश्वेश्वरं साम्बमूर्तिं प्रणिपत्य गिरां गुरुम् ।
टीकां शिशुहितां कुर्वे तर्कसंग्रहदीपिकाम् ॥ १ ॥

---

## ❀ किरणावली ❀

तर्कश्रुतिमिरावेद्यमक्षरात् परतः परम् ।
'स्वामिनारायणं'नत्वा सच्चिदानन्दविग्रहम् ॥ १ ॥
"**श्रीकृष्णवल्लभाऽऽचार्य्यः**" स्वामिनारायणाऽऽश्रितः ।
तनुते '**दीपिका**'तत्त्व-बोधिनीं '**किरणावलीम्**' ॥ २ ॥

---

'**श्रीकृष्णवल्लभाचार्य्यः**' स्वेष्टदेवदयाऽन्वितः ।
टिप्पणीं तनुते '**न्यायबोधिनी-पदकृत्ययोः**' ॥ १ ॥